# 209

**II**

**Total No. of Questions – 16**
**Total No. of Printed Pages - 4**

**Regd. No.** | | | | | | | | | | |

## Part – II
## SANSKRIT, Paper - II
**(Second Language)**

**Time : 3 Hours]** **[Max. Marks : 100**

**Note :** (1) **All** questions should be attempted.

(2) Question Nos. **1, 2 & 3** should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

**निर्देश** : प्रथमं, द्वितीयं, तृतीयं प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

1. **एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत ।** **1 × 8 = 8**

(अ) श्रुतिस्मृत्युक्तमाचारं न त्यजेत् साधुसेवितम् ।
दैत्यानां श्रीवियोगोऽभूत् सत्यधर्मच्युतात्मनाम् ।।

(आ) धीरो भव सदा चित्ते निर्भयोऽस्मीति भावय ।
भयं मृत्युर्भयं पापं नरको भयमेवं हि ।।

2. **एकं निबन्धप्रश्नं समाधत्त ।** **1 × 6 = 6**

(अ) गङ्गा भगीरथस्य पितृदेवतानां पापं कथं धौतवती ?

(आ) हरिश्चन्द्रः सत्यमेव जयते इति कथं निरूपितवान् ?

3. **एकं निबन्धप्रश्नं समाधत्त ।** **1 × 6 = 6**

(अ) शुकशावकः हारीतेन कथं रक्षितः ?

(आ) दधीचिः दानवीरः कथम् अभवत् ?

4. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

(आ) चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते ?

(इ) पितृसद्मगोचरः अपि शिवः कीदृशः ?

(ई) गरुडेन कः त्वमिति पृष्टः जीमूतवाहनः किमवदत् ?

(उ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(ऊ) आत्मनः वनगमनविषये रामः भरतं किमवदत् ?

5. द्वौ ससन्दर्भौ व्याख्यात । $2 \times 3 = 6$

(अ) मनोरथो महानेषः भगीरथ ! महारथ !

(आ) किमिवान्यत्कलिरेक एव धन्यः ।

(इ) अवदत् माङ्गलिकं गलेऽस्ति ते ।

(ई) जातस्त्वं भुवि गौतमस्य ।

6. द्वौ ससन्दर्भौ व्याख्यात । $2 \times 3 = 6$

(अ) अनाथपरिपालनं हि धर्मः अस्मद्विधानाम् ।

(आ) भो भोः । मा भैष्ट भद्राः ।

(इ) ईदृशस्य नृपस्य राज्ये जलपानमपि अधर्मः ।

(ई) कथं च वयं तदस्थीनि प्राप्नुयाम ।

7. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) हरः गङ्गां किं प्रति विससर्ज ?

(आ) अगस्त्यः कम्परायाय किमर्थं खड्गं प्रेषयति ?

(इ) कैः प्रीतिसङ्गतिं न कुर्यात् ?

(ई) केन सर्वरोगस्य सम्भवः भवति ?

(उ) विश्वामित्रः हरिश्चन्द्राय किं ददे इति अवदत् ?

(ऊ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

8. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) शूद्रकस्य राजधानी का ?

(आ) गोपाः इन्द्रस्य पूजां त्यक्त्वा कस्य पूजां कृतवन्तः ?

(इ) वीरः कः ? सः किमर्थं भूमण्डले निवसति ?

(ई) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?

(उ) कदा चूडाला जटाश्मश्रुवेषं विमुच्य राजः सम्मुखम् अतिष्ठत् ?

(ऊ) त्रिशिराः त्रिभिः शिरोभिः किं किम् अकरोत् ?

9. **एकेन वाक्येन समाधानं लिखत ।** **5 × 1 = 5**

(अ) का जह्नुसुता इति प्रोच्यते ?

(आ) मधुराराजः कीदृशः ? कंसवन्नृशंसम

(इ) कतिभिः दिनैः चाणक्यः नन्दान् अपातयत् ?

(ई) शूरं केन भेदयेत् ?

(उ) किं पाषाणमयम् अभूत् ?

10. **एकेन वाक्येन समाधानं लिखत ।** **5 × 1 = 5**

(अ) शुकस्य नाम किम् ?

(आ) कृष्णचरितं केन विरचितम् ?

(इ) परनारीसहोदरः कः ?

(ई) नरेन्द्रः केन नाम्ना लोकविख्यातः अभवत् ?

(उ) उज्जयिन्याः राजा कः ?

11. अधोनिर्दिष्टां कथां पठित्वा प्रश्नानां समाधानानि लिखत । **5 × 1 = 5**

आसीत् व्याघ्रपुरे जीर्णधनः नाम वणिक् । सः पित्र्यं यत्किञ्चित् धनं भोगेन क्षपितवान् । अथ द्रव्यक्षयात्तत्र वासं कर्तुं लज्जमानः देशान्तरं गन्तुमैच्छत् । तस्य गृहे लोहभारघटीता तुला कापि आसीत् । सः तां स्वमित्रस्य कस्यापि श्रेष्ठिनो गृहे निक्षिप्य जगाम । कतिपयदिनान्तरम् सः श्रेष्ठिगृहं गत्वा सा निक्षेपतुला दीयताम् इत्याह । वञ्चकः श्रेष्ठी तुला कस्यांचित् रात्रौ मूषकैः भक्षिता इति अवदत् । वणिक् तु तस्य वञ्चनां ज्ञात्वापि किमपि नोवाच । ततः नदीस्नानाय गच्छन् सः श्रेष्ठिनः पुत्रं आत्मना सह अनयत् । किञ्चित्कालानन्तरं पुनरागत्य सः श्रेष्ठिनमवोचत् यत् बालः हठादागतेन गृध्रेण नीतः । कथं तदिति पृच्छति तस्मिन् सोऽवदत् "यथा मे तुला मूषकैः भक्षिता तथा ते पुत्रः गृध्रेण नीतः" ।

**प्रश्नाः**

(1) वणिजः नाम किम् ?

(2) वणिक् धनं केन क्षपितवान् ?

(3) वणिक् किमर्थं देशान्तरं गन्तुमैच्छत् ?

(4) वणिजः गृहे का आसीत् ?

(5) वञ्चकः श्रेष्ठी तुलाविषये किमुक्तवान् ?

12. नामनिर्देशपूर्वकं त्रीणि सन्धत्त । $3 \times 2 = 6$

(अ) अरीन् + जयति (आ) रामस् + षष्ठः

(इ) सुप् + अन्तम् (ई) षट् + मुखः

(उ) रामः + करोति (ऊ) निः + सन्देहः

13. नामनिर्देशपूर्वकं त्रीणि विघटयत । $3 \times 2 = 6$

(अ) मनश्चलति (आ) आकृष्टः

(इ) अजादिः (ई) वाङ्महिमा

(उ) गुरुर्जयति (ऊ) नमस्ते

14. द्वयोः शब्दयोः सविभक्तिरूपाणि लिखत । $2 \times 6 = 12$

(अ) मरुत् (आ) वाक्

(इ) नामन् (ई) यद् (स्त्री)

15. समासनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) यथाशक्ति (आ) गोहितम्

(इ) विद्याधनम् (ई) पञ्चवटी

(उ) महाबलः (ऊ) सुखदुःखम्

16. अधोरेखाङ्कितपदं शुद्धीकृत्य वाक्यं लिखत । $5 \times 1 = 5$

(अ) ग्रन्थालये पुस्तक सन्ति ।

(आ) सः विद्यालये अपठताम् ।

(इ) युवां जलं पास्यथ ।

(ई) वयं विपणिं गमिष्यामि ।

(उ) एतौ अधुना चलनचित्रं पश्यति ।